निपुणा स्त्री ब्रह्मवादिन्यपि। पापेऽस्ते नवमगतग्रहस्य तुल्यां प्रव्रज्यां युवतिरुपैत्यसंशयेन। उद्वाहे वरणविधौ प्रदानकाले चिन्तायामपि सकलं विधेयमेतत्”। जातकपद्धत्यादौ विस्तरो दृश्यः। ५सुन्दरे त्रि० चतुर्जातकम्।

**जातकचक्रम्** ज्यो० उक्ते जातस्य शुभाशुभसूचके चक्रभेदे तच्च चक्रं ज्यो० त० उक्तं यथा

“युद्धजयार्णवे यस्मिन्नृक्षे स्थितोभानुस्तदादित्रीणि मस्तके। मुखे त्रीणि तथा द्वे भे स्कन्धयोर्भुजयोरुभे। द्वे हस्तयोः पञ्च हृदि नाभावेकं तथा गुदे। तथा जानुयुगे द्वे द्वे पादयोर्जलधिं४ न्यसेत्। चरणर्क्षेषु यो जातः सोऽल्पायुर्भवति प्रिये!। जानुनोर्भ्रमणाशक्तो गुह्ये स्यात् पारदारिकः। नाभौ स्वल्पधनो देवि! हृदये स्यान्महाधनः। पाण्योर्जातो भवेच्चौरो भुजयोर्दुःखभाजनम्। स्कन्धयोर्भोगभोगी च मुखे धर्मरतो धनी। मूर्द्ध्नि राजा भवेद्देवि! बालानां जन्मतोवदेत्”। स्वरोदये। “मुखे शीर्षे शतं वर्षं नवतिः स्कन्धयोर्द्वयोः। पञ्चाशीतिर्हृदि प्रोक्ता हस्तयोः सप्ततिः क्रमात्। बाह्वोः षट्षष्टिवर्षाणि गुह्ये षट्षष्टिका क्रमात्। पञ्चाशत् जङ्घयोः पादे निर्द्धनस्त्वाल्पजीवनः”।

**जातकर्म्मन्** न० जाते कर्म। पुत्रजन्मनिमित्ते पितृकर्त्तव्ये पुत्रसंस्कारभेदे। तच्च आश्व० गृ० १।१५।१ दर्शितं यथा।

“कुमारं जातं पुराऽन्यैरालम्भात् सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत् “प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनाम्। आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अस्मिन्निति”। सू०। “इदं जातकर्म। कुमारग्रहणं कुमारीनिवृत्त्यर्थम्। ननु कुमार्य्या अपि भवत्येव जातकर्म। कुतः। वक्ष्यति “आवृतैव कुमार्य्याः” इति, उच्यते। प्रवासादागतस्य विहितं कर्मावृता भवति न जातकर्म अनन्तरत्वात्। एवमेके अन्ये पुनरावृतैव कुमार्य्या इत्येतदुभयार्थमिति वदन्ति। तेन कुमार्य्या अपि जातकर्म भवति। मनुनाप्युक्तम् “अमन्त्रिका तु कार्य्येयं स्त्रीणामावृदशेषतः” इति। तर्हि कुमारग्रहणं किमर्थम्? अधिकारार्थम्। “अष्टमे वर्षे ब्राह्मणमुपनयेदित्युपनयनं कुमारस्यैव यथा स्यात् न कुमार्य्या इति। ननु ब्राह्मणमिति पुंलिङ्गनिर्देशादेव न भविष्यति। न जातिनिर्देशे लिङ्गमविवक्षितम्। यथा ब्राह्मणो न हन्तव्य इति ब्राह्मण्यपि न हन्यते एवमत्रापि स्त्रियाः प्रसज्यते तन्निवृत्त्यर्थं कुमारग्रहणमिति। जातग्रहणमप्यधिकारार्थम्। “गोदानं षोड़शे वर्षे” इति जन्मतः प्रभृतिषोड़शोयथा स्यात् उपनयनप्रभृति मा भूदिति। पुरा पूर्वमित्यर्थः अन्यग्रहणमनधिकृतालम्भनात् प्राक् कर्म कर्त्तव्यमित्येवमर्थम्। सर्पिर्मधुनी हिरण्येन निकाशयति। ते हिरण्यसंसृष्टे हिरण्येन प्राशयेत् मातुरुपस्थ आसीनं “प्र ते ददामीति” मन्त्रेण नारा० वृ०।

“कर्णयोरुपनिधाय मेधाजननं जपति। “मेधान्ते देवः सविता मेधां देवी सरस्वती। मेधान्ते अश्विनौ देवावाधत्तां पुष्करस्रजौ”। सू० “अस्य कर्णयोः हिरण्यं निधाय मेधाजननं जपति मेधान्त इति। उपग्रहणं तस्य मुखसमीपे आत्मनोमुखं निधाय जपार्थं मेधाजननमित्यस्य मन्त्रस्याख्या सकृन्मन्त्रः। पर्य्यायेणोपनिधानमित्येके। अन्ये मन्त्रावृत्तिमिच्छन्ति” नारा० “गार्भैर्होमैर्जातकर्म्मचौड़मौञ्जीनिबन्धनैः। प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते” मनुः। “नाभिवर्द्धनात् नाभिसम्बन्धात् नाड़ीच्छेदनात्। वैजवापिः “जन्मनोऽनन्तरं कार्य्यं जातकर्म यथाविधि। दैवादतीतः कालश्चेत् अतीते सूतके भवेत्”। एवञ्च, “मृदुध्रुवचरक्षिप्रभेष्वेषामुदयेऽपि वा। गुरौ शुक्रेऽथ वा केन्द्रे जातकर्म्म च नाम च” इति ज्योतिःशास्त्रोक्तं दैवात् कालोत्कर्षे वेदितव्यम्। अनुत्कर्षेऽपि नक्षत्रादिनियमो न, नैमित्तिकस्य निमित्तानन्तरभावित्वेन निरवकाशत्वात् ज्यो० त०।

**जातमात्र** त्रि० जात एव। सद्योजाते। “जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत्” पञ्चत०।

**जातरूप** न० जातं प्रशस्तं जात+प्राशस्त्ये रूपप्। १स्वर्णे २धुस्तूरवृक्षे पु० अमरः। ३उत्पन्नरूपे त्रि०। “न जातरूपच्छदजातरूपता” नैष०। “कमण्डलुमुपादाय जातरूपमयान् शुभान्” भा० स० ४७ अ०।

**जातविद्या** स्त्री जाते निष्पन्ने होमादौ विद्या विद्यतेऽनया विद्या प्रायश्चित्तज्ञापिका वाक्। होमादिनिष्पत्त्यनन्तरं प्रायश्चित्तबोधके वाक्यभेदे “ब्रह्मा त्वो वदति जातविद्याम्” ऋ० १०।७१।१२। “जाते जाते कर्त्तव्ये प्रायश्चित्तादौ विद्यां वेदयित्रीं वाचं वदति ब्रह्मा हि सर्वं वेदितुं योग्यो भवति खलु” भा०।

**जातवेदस्** पु० जातं सद्योजातं विन्दति प्राप्नोति विद—